# 7. प्रत्यभिज्ञानम्

---

## अभ्यासः

**प्रश्न: 1. एकपदेन उत्तरं लिखत**
(क) क: उमावेषमिवाश्रितः भवति?
(ख) कस्याः अभिभाषणकौतूहलं महत् भवति?
(ग) अस्माकं कुले किमनुचितम्?
(घ) कः दर्पप्रशमनं कर्तुमिच्छति?
(ङ). कः अशस्त्रः आसीत्?
(च) कया गोग्रहणम् अभवत्?
(छ) कः ग्रहणं गतः आसीत्?

**उत्तर:**
(क) अर्जुनः/बृहन्नला
(ख) बृहन्नलायाः
(ग) आत्मस्तवम्/आत्मप्रशंसा
(घ) राजा
(ङ) भीमसेनः
(छ) सौभद्रः/अभिमन्युः
(च) दिष्ट्या /भाग्येन
(घ) राजा

**प्रश्न: 2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत**
(क) भटः कस्य ग्रहणम् अकरोत्?
(ख) अभिमन्युः कथं गृहीतः आसीत्?
(ग) कः वल्लभ-बृहन्नलयोः प्रश्नस्य उत्तरं न ददाति?
(घ) अभिमन्युः स्वग्रहणे किमर्थम् आत्मानं वञ्चितम् अनुभवति?
(ङ) कस्मात् कारणात् अभिमन्युः गोग्रहणं सुखान्तं मन्यते?

**उत्तर:**
(क) भटः अभिमन्योः ग्रहणम् अकरोत्।
(ख) अशस्त्रभीमसेनेन रथम् आसाद्य बाहुभ्याम् अभिमन्युः गृहीतः आसीत्।
(ग) अभिमन्युः वल्लभ-बृहन्नलयोः प्रश्नस्य उत्तरं न ददाति।
(घ) युद्धक्षेत्रे अशस्त्रभीमं दृष्ट्वा अभिमन्युः तम् प्रहारं न करोति भीमसेनः च अभिमन्यु बाहुभ्याम्

www.dreamtopper.in

गृहीतवान्। अतः अभिमन्युः स्वग्रहणे वञ्चितः इव अनुभवति।
(ङ) अभिमन्युः गोग्रहणं सुखान्तं मन्यते यतः अनेन तस्य स्वपितरः दर्शिताः।

**प्रश्नः 3. अधोलिखितवाक्येषु प्रकटितभावं चिनुत**
(क) भोः को नु खल्वेषः? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि। (विस्मयः, भयम्, जिज्ञासा)
(ख) कथं कथं! अभिमन्यु माहम्। (आत्मप्रशंसा, स्वाभिमानः, दैन्यम्)
(ग) कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे? (लज्जा, क्रोधः, प्रसन्नता)
(घ) धनुस्तु दुर्बलैः एव गृह्यते मम तु भुजौ एव प्रहरणम्। (अन्धविश्वासः, शौर्यम्, उत्साहः)
(ङ) बाहुभ्यामाहृतं भीमः बाहुभ्यामेव नेष्यति। (आत्मविश्वासः, निराशा, वाक्संयमः)
(च) दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः। (क्षमा, हर्षः, धैर्यम्)

**उत्तरः**
(क) विस्मयः
(ख) स्वाभिमानः
(ग) क्रोधः
(घ) शौर्यम्
(ङ) आत्मविश्वासः
(च) हर्षः

**प्रश्नः 4. यथास्थानं रिक्तस्थानपूर्तिं कुरुत**

| | | | | |
|---|---|---|---|---|
| (क) | खलु | + एषः | = | ........................ |
| (ख) | बल | + ................. + अपि | = | बलाधिकेनापि |
| (ग) | विभाति | + उमावेषम् + इव + अक्षितः | = | विभात्युमावेषम् |
| (घ) | ................. | + एनम् | = | वाचालयत्वेनम् |
| (ङ) | रुष्यति | + एष | = | रुष्यत्येष |
| (च) | त्वमेव | + एनम् | = | ........................ |
| (छ) | यातु | + ................. | = | यात्विति |
| (ज) | ................. | + इति | = | धनञ्जयायेति |

www.dreamtopper.in

**उत्तर:**

| | | | | | | |
|---|---|---|---|---|---|---|
| (क) | खलु | + | एषः | | = | **खल्वेषः** |
| (ख) | बल | + | **अधिकेन** | + अपि | = | बलाधिकेनापि |
| (ग) | विभाति | + | **इव** | + **उमावेषम्** | = | बिभात्युमावेषम् |
| (घ) | **वाचालयतु** | + | एनम् | | = | वाचालयत्वेनम् |
| (ङ) | रुष्यति | + | एष | | = | रुष्यत्येष |
| (च) | त्वमेव | + | एनम् | | = | **त्वमेवैनम्** |
| (छ) | यातु | + | **इति** | | = | यात्विति |
| (ज) | **धनञ्जयाय** | + | इति | | = | धनञ्जयायेति |

**प्रश्नः 5. अधोलिखितानि वचनानि कः कं प्रति कथयति यथा- कः के प्रति**

| | **यथा–** | **कः** | **कं प्रति** |
|---|---|---|---|
| | आर्य, अभिभाषणकौतूहलं मे महत् | बृहन्नला | भीमसेनम् |
| (क) | कथमिदानीं सावज्ञमिव मां हस्यते | ...................... | ...................... |
| (ख) | अशस्त्रेणेत्यभिधीयताम् | ...................... | ...................... |
| (ग) | पूज्यतमस्य क्रियतां पूजा | ...................... | ...................... |
| (घ) | पुत्र! कोऽयं मध्यमो नाम | ...................... | ...................... |
| (ङ) | शान्तं पापम्! धनुस्तु दुर्बलैः एव गृह्यते | ...................... | ...................... |

www.dreamtopper.in

**उत्तर:**

| | | | **कः** | **कम् प्रति** |
|---|---|---|---|---|
| (क) | कथमिदानीं सावज्ञमिव मां हस्यते | – | अभिमन्युः | बृहन्नलाम् |
| (ख) | अशस्त्रेणेत्यभिधीयताम् | – | अभिमन्युः | भीमसेनम् |
| (ग) | पूज्यतमस्य क्रियतां पूजा | – | उत्तरः | नृपम् |
| (घ) | पुत्र! कोऽयं मध्यमो नाम | – | भगवान् | अभिमन्युम् |
| (ङ) | शान्तं पापम्! धनुस्तु दुर्बलैः एव गृह्यते। | – | भीमसेनः | अभिमन्युम् |

**प्रश्नः 6. अधोलिखितानि स्थूलानि सर्वनामपदानि कस्मै प्रयुक्तानि**

(क) वाचालयतु एनम् आर्यः।
(ख) किमर्थं तेन पदातिना गृहीतः।
(ग) कथं न माम् अभिवादयसि।

(घ) मम तु भुजौ एव प्रहरणम्।
(ङ) अपूर्व इव अत्र ते हर्षो ब्रूहि केन विस्मितः असि?

**उत्तर:**
(क) वाचालयतु एनम् आर्यः। — अभिमन्यवे
(ख) किमर्थं तेन पदातिना गृहीतः। — भीमसेनाय
(ग) कथं न माम् अभिवादयसि। — नृपाय
(घ) मम तु भुजौ एव प्रहरणम्। — भीमसेनाय
(ङ) अपूर्व इव अत्र ते हर्षो ब्रूहि केन विस्मितः असि? — भटाय

**प्रश्नः 7. श्लोकानाम् अपूर्णः अन्वयः अधोदत्तः। पाठमाधृत्य रिक्तस्थानानि पूरयत**
(क) पार्थं पितरं मातुलं ......... च उद्दिश्य कृतास्त्रस्य तरुणस्य युक्तः ।
(ख) कण्ठश्लिष्टेन ......... जरासन्धं योक्त्रयित्वा तत् असह्यं ......... कृत्वा। (भीमेन) कृष्णः अतदर्हतां नीतः।
(ग) रुष्यता ......... रमे। ते क्षेपेण न रुष्यामि, किं .........अहं नापराद्धः, कथं (भवान्) तिष्ठति, यातु इति।
(घ) पादयोः निग्रहोचितः समुदाचारः .. । बाहुभ्याम् आहृतम् (माम्) ......... बाहुभ्याम् एव नेष्यति।

**उत्तर:**
(क) पार्थं पितरम् मातुलं जनार्दनम् च उद्दिश्य कृतास्त्रस्य तरुणस्य युद्धपराजयः युक्तः।
(ख) कण्ठश्लिष्टेन बाहुना जरासन्धं योक्त्रयित्वा तत् असह्यं कर्म कृत्वा (भीमेन) कृष्णः अतदर्हतां नीतः।
(ग) रुष्यता भवता रमे। ते क्षेपेण न रुष्यामि, किं उक्त्वा अहम् नापराद्धः, कथं (भवान्) तिष्ठति, यातु इति।
(घ) पादयोः निग्रहोचितः समुदाचारः क्रियताम्। बाहुभ्याम् आहृतम् (माम्) भीमः बाहुभ्याम् एव नेष्यति।

**(अ) अधोलिखितेभ्यः पदेभ्यः उपसर्गान् विचित्य लिखत**
पदानि — उपसर्गः
यथा- आसाद्य — आ
(क) अवतारितः — ................
(ख) विभाति — ................
(ग) अभिभाषय — ................
(घ) उद्भूताः — ................
(ङ) उत्सिक्तः — ................
(च) प्रहरन्ति — ................
(छ) उपसर्पतु — ................

www.dreamtopper.in

(ज) परिरक्षिताः — ................
(झ) प्रणमति — ................

**उत्तर:**
(क) अवतारितः — अव
(ख) विभाति — वि
(ग) अभिभाषय — अभि
(घ) उद्भूताः — उद्
(ङ) उत्सिक्तः — उत्
(च) प्रहरन्ति — प्र
(छ) उपसर्पतु — उप
(ज) परिरक्षिताः — परि
(झ) प्रणमति — प्र

www.dreamtopper.in